**ORIENTAL INSTITUTE, BARODA.**

Acc. No. 22196.

Subject ज्योतिष

Name जैमिनीसूत्रटीका Incomplete

Author –

Age –

Extent fols. 20 grs. 480

Language Sanskrit

Script Devanāgari

Source: R. G. Shukla Karanali Coll. Gift

श्रीगणेशायनमः॥सृष्टिस्थित्यंतकर्त्री हरिहरविधिभिः सेवितानंददात्रीनानातंत्रोक्तमा
र्गैर्मुनिभिरपिधियाभालचंद्रोज्वलांगी॥आरक्ताभात्रिनेत्राशिवशबनिलयाराजराजेश्व
रीसावाचंनोह्यातनोतुप्रतिपदकठिनेजैमिनेःसूत्रसंघे॥१॥चिवस्वद्दूशाग्र्यावनिपति
वरश्रीरणजितोदयांभोधेर्वाचातवकरुणयाजैमिनिमुनेः॥निरालंबेशास्त्रेजननिगि
रिजेयास्यतिनकिंसुरीकांमेकामोहृदिसमभिपूर्तिंरचयितुं॥२॥अथप्राक्तनकर्मज्ञाना
नुष्टेयकाशीवासादिनाजगदुद्धारचिकीर्षुःकरुणासिंधुर्जैमिनिमुनिःप्रेप्सितग्रंथप्र
तिबंधकोपशामनायश्रीशंकरप्रणामपूर्वकसकललोकशुभाशुभसूचकजातकशा
स्त्रमनुष्टातुंप्रतिजानीते अथसूत्रम् उपदेशंव्याख्यास्यामः१ उचततपदंचउपदंतस्य
शःशंकरस्तंव्याख्यास्यामःनमस्कुर्मः।उकारःशंकरःप्रोक्तइत्येकाक्षरकोशः।प्रकृता
र्थस्तु उपदिश्यतेप्रकाश्यतेप्राक्तनशुभाशुभकर्मानेनेत्युपदेशोजातकशास्त्रविशेषय ॥१॥
स्तंव्याख्यास्यामः।कथयिष्यामइत्यर्थः।नन्वस्मिन्शास्त्रेकिमन्यशास्त्रतोदृष्टिर्विलक्ष

णा वान्यत्रा शास्त्रप्रसिद्धेवेति संशयं परिहरन्नाह॥ अभिपश्यन्त्यृक्षाणि पार्श्वे नेच ऋ।
क्षाणि राशयः अभिसन्मुखं पार्श्वे पार्श्वराशीं च पश्यंति अवलोकयंति॥ क्रमतश्च
रेऽष्टमपंचमेकादशाराशयः। स्थिरे षष्ठतृतीयनवमराशयः। द्विस्वभावे सप्तमचतुर्थ
दशमराशयस्तथा भवंतीति दृष्टिचक्रे द्रष्टव्यम्॥ वृद्धकारिका च॥ चरं धनं विनास्वाद्यं
स्थिरमंत्यं विना चरं। युग्मे स्वं न विना युग्मं पश्यतीत्ययमागम इति॥ तदयं संग्रहः॥ च
रा नाग८ बाण५ रा११ राशीन्स्वतो वै स्थिराः षट्६ तृतीयां३ क९ राशीन् क्रमेण॥ स्वतः
द्वौ ल७ भं वेद४ भं पंक्ति१० भं चक्रमाद्विस्वभावाश्च पश्यंति पूर्णं इति रराशिषु सिद्धं द्रष्टु
दृश्यभावं खेटघतिदिशाति। तन्निष्ठाश्च तद्वत्॥ तन्निष्ठाः राशिस्थिताः ग्रहास्तद्वत्
ते राशिभिस्तुल्यं यथा भवति तथा स्वस्थितराशिवदेव स्वतोष्टमादिराशीस्तन्निष्ठग्र
हांश्च पश्यंतीत्यर्थः। तथा चोक्तं वृद्धैः। चरस्थं स्थिरगः पश्येत् स्थिरस्थं चरराशिगः। उभय
स्थं तूभयगो निकटस्थं विनाग्रहं॥ अथ स्थभागस्थे धनसमृद्धिरित्यादिसूत्रे षड्वर्गेस।

पदसंकेतस्याकांक्षांनिवर्तयन्नाह दारभाग्यश्शूल११स्थाऽर्गलानिध्यातुः॥४ विचारा
श्रयीभूतस्यराशेर्निध्यातुर्द्दृष्टुर्ग्रहाद्दार४भाग्यश्शूल११स्थाः दारादिपदबोध्यचतु
र्थद्वितीयैकादशस्थानस्थिताग्रहाविचाराश्रयीभूतराशिद्द्रष्टुर्ग्रहस्यअर्गलाःअ
र्गलासंज्ञकाःस्युःअर्गलाकर्तारइतियावत्॥ननुस्वाम्यादिभिर्निध्यातुःफलदा
तुरित्युक्तंत्वयाऽयमर्थःकथंज्ञातइतिचेच्छृणु॥भयरपुण्य११विनाशभावाद्द्रष्टुराहुः
शुभार्गलामितिशुद्धवाक्यादेवशुभार्गलमर्गलकर्तृत्वं॥विपरीतार्गलमर्गलाप्रतिब
धकत्वमिति॥छंदोवत्सूत्राणीत्युक्तेः॥संधिश्छांदसः॥ अत्राक्षरैरेवराशिभावाबोध
नंमुनेरभिप्रेतमित्यनुपदमेवस्फुटीभविष्यति॥अस्मिन्ग्रंथेकटपयादिक्रमेणांका
ग्राह्याः॥तत्रापिद्वादशाधिकसंख्यासन्निपातेद्वादशतष्टंकृत्वाऽवशिष्टसंख्यारा
शिभावाबोधिका अत्रग्राह्यकारिकाच कटपयवर्गभवैरिहपिंडांत्यैरक्षरैरंकाः॥
नञिचशून्यंज्ञेयंतथास्वरेकेवलेकथितमिति यथादारस्यत्रांकानांवामतोगतिरिति ॥२॥

रीत्यादकारस्याऽष्टसंख्यारेफस्यद्विसंख्येत्यष्टाविंशतिसंख्यामापन्नेःपुंजेद्वादशात
ष्टचोर्वरिताचतुःसंख्याभावाबाधिकेति॥इयमर्गलाशुभपापेक्षेभयसाधारणी॥
नचोक्तार्गलाप्रतिबंधकमाह्रो वक्तव्यमितिवाच्यम्॥तथासत्यर्गलापदस्यमंडूकप्लु
त्यानुवृत्तेरस्वारस्यादर्गलांतरमेवाह।सूत्रं कामस्थातुभूयसापापानाम् पापानांर
विक्षीणचंद्रभौमशनिराहुकेतुपापयुक्तबुधानांभूयसाबाहुल्येन पापानांइतिबहु
वचननिर्देशात्त्रिप्रभृतिभिःपापैःकामस्थानतृतीयस्थानस्थाऽर्गलाभवं एकेनपापेनद्वा
भ्यांचनेत्यर्थःइयमर्गलापापसंबंधिनी।पूर्वातुशुभपापसाधारणा॥प्रेमनिधिपंडितैस्तु
पापानांमध्येयोधिकांशकस्तेनतृतीयेर्गलाभवतीतियदुक्तं तत्सूत्राक्षरान्नायाति॥पा
पानांभूयसेत्यनेनपापबाहुल्यंलायातिइति बहुपापकृतकामस्थार्गलायानिर्बाधकत्वा
त्पापभूयस्त्वकृतत्वाच्चपृथकसूत्रमिदम्॥पूर्वार्गलाबाधकान्याह सूत्रम् रिष्फनीचका
मस्थाविरोधिनःद्या।दारेत्यादिपदबोध्यचतुर्थद्वितीयैकादशस्थानस्थितानामर्गलाकर्त

जै॰सू॰टि॰ णां खेटानां क्रमेण रिष्फादिपदबोध्यं दशमद्वादशतृतीयस्थानस्थिताग्रहा विरोधिनः अ
र्गलाप्रतिबंधका इत्यर्थः। तथा च दशमादिस्थानेषु ग्रहाभावे सत्येव चतुर्थादिस्थानस्थग्र
हैरर्गला भवति नान्यथेति भावः इत्यर्थः अथ बाधकबाधकान्याह सूत्रम् न न्यूना विबला
श्च ॥७॥ अर्गलाकर्तृग्रहेभ्यः प्रतिबंधका न्यूना अल्पसंख्याकाः द्वौ चेदर्गलाकर्त्तारावेकश्चे
त्प्रतिबंधक इत्यादि विबला निर्बलाश्च यदि तदा प्रतिबंधका न स्युः। बलमग्रे निरूप
यिष्यति अर्गलास्तत्प्रतिबंधकाश्च स्पष्टेरुक्ताः॥ भयरपुएयय११ विनाध भावा दृष्टुराकुः शुभा
र्गलं स्फुटं ११ गैर्ज्ञेयं १० भावास्तु विपरीतार्गलं विदुः। द्रष्टुर्ईष्टुर्ग्रहस्य द्वितीयादितः शुभार्ग
लं द्वादशादितोऽशुभार्गलं प्राकुः शुभार्गलविरोध्यर्गलमेव विपरीतार्गलमित्युच्यते अ
थ तृतीयार्गलमुपदर्शयति सूत्रम् प्रागवत्त्रिकोणे ८ प्रागवदिति त्रिकोणे पंचमनवमयोः
अर्गला तत्प्रतिबंधकश्च प्राग्वत् पंचमे ग्रहसत्वेऽर्गला नवमे न्यूनसंख्यात्व निर्बलत्व
दोषरहितग्रहसत्वेर्गला प्रतिबंधकत्वमिति नचदारेत्यादिसूत्रेणांतपदरिष्फेत्यादिसू ॥३॥

त्रेधात्वपदस्योपादानादेवार्थलाभेसूत्रांतरनिर्माणस्यवैयर्थ्यापत्तिरितिवाच्यम् विप
रीतंकेतोरितिसूत्रेकेतुकृतव्यत्ययस्यत्रिकोणएववक्तव्यत्वात्साफल्यप्रसंगात् अ
न्यथाहिद्वादशभाग्यस्थलेष्वपिकेतुकृतव्यत्ययापत्तिरितिभावः॥यत्तुकेचिदुक्तंप्राग्वदिति
सूत्रस्यपृथक्करणसामर्थ्याद्प्रतिबंधेयमर्गलेति तन्न तथासतिकामस्थेतिसूत्रो
त्तरमेवप्रसंगात् तन्निमित्तस्यादिति विपरीतंकेतोरितिसार्वत्रिकंयदुक्तंतदपिन का
मस्थेतिसूत्रोत्तरंप्राग्वदितिसूत्रंचेत्तदासार्वत्रिकंस्यात्॥प्राग्वदितिसूत्रानंतरप्रणयना
त्तत्रैवास्यप्रवृत्तिरित्यर्थः॥विपरीतमितिसूत्रस्योत्तरसूत्रेन्वयइतियदुक्तंतदपिन अ
ष्टानांवेतिपृथक्करणसामर्थ्यादिवराहोन्यूनांशत्वेनकारकत्वलाभादेतदन्वयस्यवैय
र्थ्यापत्तिः॥अष्टानांवेत्यन्यमतंयदुक्तंतत्रप्रमाणाभावइति अथकेतोविशेषमाह सूत्रम्
विपरीतंकेतोः९ केतोर्ग्रहस्यनवममर्गलास्थानंपंचमंप्रतिबंधकस्थानं किंच सतिमुने
स्तात्पर्यंकेतोर्लग्नस्यवेति अस्मिन्ग्रंथेविशेषतःतत्कारकांशफलादेशोवक्तव्यकारकांवि

वक्ष्यराद्दावात्मकारकं दर्शयति॥सूत्रम् आत्माऽधिकःकलादिभिर्नभोगःसप्तानामष्टानांवा
॥रव्यादिशन्यंतानांसप्तानांराह्वंतानामष्टानांवामध्येयोनभोगोग्रहःकलादिभिःकला
याआदयोंशास्तैरंशैरंशादिभिरितियावत् अधिकःसआत्मा आत्मकारकइत्यर्थः॥अं
शपदंविहायकलापदेननिर्देशस्त्वंशसाम्येपिकलादिकाधिक्येननिर्णेतव्यमितिज्ञापना
र्थम् कलादिभिरपिसाम्येवक्ष्यमाणबलेनैकतरनिर्णयः॥यत्रद्वित्र्यादिग्रहाणामंशादिसा
म्येनकारकलोपस्तत्रबलवत्स्थिरकारकादेवतत्तत्कारकविचारः॥कर्त्तव्यइति ननुआ
त्माधिकःकलादिभिर्नभोगोष्टानामित्येवपाठेसुलाघवात् उच्यते तत्राधिकपदस्यनिवि
ष्टत्वाद्राहोस्तुसर्वग्रहांशान्यूनांशतयात्मकारकतेतिसूचनायाष्टानांवेतिपृथगुक्तिः॥न
नुकथंशातमितिचेत् राहोर्विपरीतसंचारात्न्यूनत्वेनैवाधिक्यात् नभोष्टानामितिपाठे गो
त्वन्यग्रहरीत्याराहोरप्याधिक्यंप्रतीयेत द्वित्र्याणांग्रहाणांब्रह्मत्वयोगप्रसक्तेराहुयोगे
विपरीतमितिसूत्रेणराहोर्योगेनापिन्यूनांशस्यब्रह्मत्वं स्वस्यतुसुतरामेवाल्पांशत्वेनकार

कत्वं भवतीत्यर्थः अथ वृद्धसंमतिः। भागाधिकः कारकः स्यादल्पभागोन्यकारकः इति न च वृद्ध
वाक्याद्राहोर्न्यूनांशत्वेनात्मकारकत्वं नायातीति वाच्यम् शास्त्रप्रसिद्धतया बालानामपि
तथैव बोधाद्विविच्य नोक्तम्॥ अत्र वृद्धवाक्यांतरं च मेषाद्यसव्यमार्गेण राहूकेतू न का
रको अस्यार्थः राहुकेतू मेषाद्यसव्यमार्गेण सव्यं वामं असव्यं दक्षिणं असव्येमा
र्गेण दक्षिणमार्गेण मेषादिक्रमेण मार्गेण कारकौ न विपरीतमार्गेण भवत एवेति फ
लितार्थः अत्र राशिस्थितमाधिक्यं न ग्राह्यमिति संप्रदायः। अथवा अंशादिभिर्ग्रहद्वय
साम्ये सप्तमकारकाभावे राहुरपि ग्राह्यः तस्मादष्टानां वेति गौणः कल्पो निरुक्तः। यत्तु
प्रेमनिधिपंथे विपरीतं केतोरिति सूत्रं देहलीदीपकन्यायेनात्रान्वेतीत्युक्तं तद्दयुक्तं
व्यादिक्रमगमनाद्दृष्ट्यादौ केतुनिरूपणस्यायोग्यत्वात् राहोरंशाधिक्येन कारकता केतो
स्तु न्यूनांशत्वेन कारकताबाधितत्वाच्च राहोरधिकांशासत्वे सति केतोरपि तथात्वात् न
वानामिति तु कथं नोक्तमिति चेत् राहुकेत्वोरंशादिसाम्येन कारकांतराभावादष्टानामि

जे॰ सू॰ टि॰

त्यैवोचितानामित्यलमतिविस्तरेणेत्यर्थः। आत्मकारकस्योत्कर्षं दर्शयति सूत्रम्। स ईष्टे बंध
मोक्षयोः। आत्मकारको बंधमोक्षयोरीष्टः स्वामी भवति नीचराशिपापयोगोच्चादिराशि
शुभयोगैरिति शेषः। नीचपापयुक्तः कारकः स्वदशांतर्दशासु बंधनादि दुःखदः स्यात्॥
उच्चादिशुभयुतस्तु ग्रहांतरबलेन बद्धस्यापि मोक्षकर्त्ता भवति॥ यद्वा। प्रतिकूल आत्मका
रकः पापकर्मप्रवृत्तिद्वारा संसाररूपबंधनदः स्यात् अनुकूलस्तु ज्ञानकाशीवासादि
भिर्मोक्षकर्त्ता स्यादित्यर्थः। अथामात्यकारकमाह। सूत्रम्। तस्यानुसरणादमात्यः। तस्या
त्मकारकस्य अनुपश्चात्सरणात् क्रमनान्न्यूनांशतयाऽमात्यः अमात्यकारको भवतीति॥
भ्रातृकारकमाह। तस्य भ्राता॥ तस्यामात्यकारकस्यानुसरणादल्पांशतया भ्रातृकारक
स्यात्। अथ मातृकारकमाह। तस्य माता। भ्रातृकारकादल्पांशो योग्रहो मातृकारको भवति।
अथ पुत्रकारकमाह। तस्य पुत्रः। मातृकारकान्न्यूनांशः पुत्रकारक इति। अथ ज्ञातिकारक
माह। तस्य ज्ञातिः। पुत्रकारकादल्पांशो ज्ञातिकारक इति॥ अथ दाराकारकमाह। तस्य दारा। ॥५॥

श्च॥ ज्ञातिकारकान्सूनांश्चः स्त्रीकारकः॥ तस्यदारा इत्यनेनैनेवसिद्धेचकारोनुक्तसमुच्चया
र्थः सन्तूस्त्रिरकारकपदोपपदादिभ्योपिस्त्रीविचारः कार्योनतुदारकारकादेवेतिसू
चयति। अथपुत्रकारकविकल्पमाह॥ मात्रासहपुत्रमेकेसमामनंति॥ मातृकारकात्पुत्रका
रकविचारः कार्यइतिकेचनाचार्यावदंति॥ कारकद्वयैक्यंवदंतीतियावत्॥ अथनित्यका
न्वक्तुमुपक्रमते॥ तत्रादौभगिन्यादिकारकान्दर्शयतिसूत्रम्॥ भगिन्यारतःश्यालः
कनीयाञ्जननीचेति। आरतोभौमात् भगिन्यासामान्यंश्यालः स्त्रीभ्राता कनीयान्कनिष्ठ
भ्राताजननीमाता एतेविचारणीयाइत्यर्थः। अथमातुलादिकारकमाह। सूत्रम्। मातुलाद
यो बंधवोमातृसजातीयाइत्युत्तरतः। उत्तरतोभौमात्त्रिमाद्बुधात् मातुलामातृभगिन्या
दयोबंधवोमातृसजातीयामातृसपत्न्यश्च विचारणीयाइत्यर्थः। अथपितामहादिका
रकमाह। पितामहः पतिपुत्राविति गुरुमुखादेवजानीयात्॥ गुरुमुखादेवगुर्वादिभ्यए
वक्रमेणपितामहपतिपुत्राइतिजानीयाद्विचार्यइत्यर्थः। नचैवंचेदग्रिमसूत्रेपत्नीप

त्तिःपितरावितिवाच्यम्।मंदात्पुत्रइति-तृतीयसूत्रोपादानापेक्षया।तथैवसुवर्चस्त्वात्
उर्वग्रितंतत्त्वग्रिमसूत्रेनिबद्धं।अन्यथामुखपदंव्यर्थमेवस्यादिति।अथपत्न्यादिषुशुक्र
कारकमाह।पत्नीपितरौश्वशुरौमातामहाइत्यंतेवासिनः।अंत्येवासिनःगुर्वग्रेपठि
ताच्छुक्रात्।भार्यामातृपितृश्वशुरश्वश्रूमातामहाविचारणीयाइत्यर्थः।ननुकारकत्वेन
द्वित्र्यादिग्रहसन्निपातेकमासंब्यविचारइतिसंदेहेकक्षाधिक्यवतस्तत्रापिसाम्येनिस
र्गबलवतःकार्यइतिरीतिःतस्माद्ग्रहाणांनिसर्गबलंसूचयति।मंदोज्यायान्ग्रहेषु।
मंदःशनिःसप्तसुग्रहेषुज्यायान्दुर्बलः।तथाचवृहज्जातके।शकुबुगुशुचराद्याद्वृ
द्धितोवीर्यवंतइति।तथाचनिसर्गबलेशन्यादयःउत्तरोत्तरबलिनइत्यर्थः।अथचरदशा
वर्षानयनोपयोगितयोजयुग्मराशिभेदेनगणनामुपदिशति।प्राचीवृत्तिर्विषमभेषु।
परावृत्त्योत्तरेषुच॥विषमभेषुमेषमिथुनादिराशिषुप्राचीवृत्तिःक्रमगणना।समराशिषु
वृषकर्कादिषुपरावृत्त्याव्युत्क्रमेणवृषमेषमीनादिक्रमेणगणनाभवतीत्यर्थः।अत्रापवा

दमाह।नक्वचित्।ओजराशिषुक्वचिन्नक्रमः।युग्मराशिषुक्वचिद्व्युत्क्रमोनेत्यर्थः।कुत्रेत्या
कांक्षायांपरंपरासूत्रार्थेनचिरंतनैरुक्तम्।क्रमाद्वृषेवृश्चिकेचव्युत्क्रमात्कुंभसिंहयोरिति
सूत्रत्रयफलितार्थसंग्रहस्त्वयं।मेषादित्रित्रिभेष्वेषांयंपदमोजेपदेक्रमात्।दशाब्दान
यनेकार्यगिणनाव्युत्क्रमात्समे।प्राचीवृत्तिर्विषमपदेपराष्टस्योत्तरइतिकथंनोक्तमिति
चेत्।यावदीशाश्रयंपदमृक्षाणामितिवक्तव्यत्वात्संदेहभियानोक्तम्।तथाचैमाष्टधर्मयोः
सामान्यंविपरीतमोजकूटयोरितिवक्तव्यत्वाच्चेति।अथतत्तद्राशेर्दशाब्दानयनायावधिं
दर्शयति।नाथांताःसमाःप्रायेण।अत्रराशीनांनाथाग्रंथांतरोक्ताग्राह्याः।अत्रानुक्तत्वा
त्।तथाहि।क्षितिजसितज्ञचंद्ररविसौम्यसितावनिजाःसुरगुरुमंदसौरिगुरवश्चगृहां
शकपाइति।नाथानामवस्थानभेपत्येनचरदशोच्यते।कुत्रचरदशापदेनव्यवहारइतिचेत्
जगतस्तस्थुषोरैक्ययोगाद्दिवत्यादौग्रहाणां।।अत्रसमाःअब्दाःनाथांताःतत्तद्राशीनांतत्तद्राशि
नाथाश्रितराशिपर्यंतंग्राह्याइति।एवंचनाथेद्वितीयेएकाब्दस्तृतीयेद्वौइतिक्रमेणद्वादशोना

जै॰सू॰टी॰ थ एकादशाब्दाः। तत्तद्राशौ नाथे सति तु द्वादशाब्दा इति विवेकः। यदुक्तं प्राच्यैः। तस्मात्तदीशापर्यं
तं संख्यामत्र दशां विदुः। वर्षद्वादशकं तत्र न चेदेकं विनिर्दिशेत्॥ अस्यार्थः। तत्तद्राशौ नाथे
स्थिते सति द्वादशवर्षाणि। असति तु एकाब्दो ग्राह्य इति। अत एव प्रायेणेति पदेन नाथांताः स
माइत्यस्यापवादः सूचितः। प्रायेणेत्यनेनैव स्वामिन उच्चत्वनीचत्वाभ्यामेकैकवर्षवृद्धिह्रासाव
पि सूचितावेव। वृश्चिककुंभयोर्हि नाथत्वमपि सूचितमेव। तदुक्तं वृद्धैः। उच्चखेटस्य सद्भावे वर्षमे
कं विनिक्षिपेत्॥ तथैव नीचखेटस्य वर्षमेकं विशोधयेदिति। अत्र वृश्चिककुंभयोर्विशेषो वृद्धैरु
क्तः। कुजसौरी केतुराहू राजानावलिकुंभयोः। कुजसौरी केतुराहू युक्तौ तत्र स्थितौ यदि। वर्षद्वा
दशकं तत्र न चेदेकं विनिर्दिशेत्॥ अयमर्थः। वृश्चिकस्य कुजकेतू राजानौ न तु तयोरेकैकमपि
कुंभस्य शनिराहू राजानौ न त्वेकमिति तथा च। न तु प्रत्येकमाधिपत्यं पर्याप्तमिति विवेकः। तथा
च द्वयोः सत्त्व एव वर्षद्वादशकं। एकसत्त्वे स्वाम्यभाव इवोक्तप्रकारेण दशाब्दगणनं कार्यमि ॥१७॥
ति। अन्यराशौ तदुभयसत्त्वे नाथांता इति रीतिरनुसर्तव्या। तयोर्भिन्नभिन्नराशिगत्वे य एव ना

ध्रोबलवांस्तत्संख्याग्राह्याः।तदुक्तं वृद्धैः।द्विनाथक्षेत्रयोरत्रनिर्णयः कथ्यतेधुना।एकः स्वक्षे
त्रगोन्यस्तुपरत्रयदिसंस्थितः।तदान्यत्रस्थितं नाथंपरित्यज्यदशां नयेत्।स्वक्षेत्रमिलितावे
वस्वामीनत्वेकुत्रास्तथा।एकस्यस्वगृहत्वं नहिकार्योपयोगिकं।द्वावप्यन्यक्षगौतौचेत्तत्रग्र
होबलवान्भवेत्।ग्रहयोगसमानत्वेचिंत्यराशिबलाद्बलं।चरस्थिरद्विस्वभावाः क्रमात्स्युर्ब
लशालिनः।राशिसत्वसमानत्वेबहुवर्षोबलीभवेत्।एकस्त्वोच्चगतस्त्वन्यः परत्रयदिसंस्थि
तः।ग्राहयेदुच्चखेटस्थंराशिमन्यंविहायवै।नाथांताइतिरीत्यायोबहुवर्षवतीदशां करो
तिबहुवर्षोसौस्वराशेर्दूरगः खगः।एवं सर्वंसमालोक्यजातस्यनिधनंवदेत् इतिस्पष्टार्थे
श्लोकाः।एकस्त्वोच्चेत्यस्यार्थः।यदितुबहुवर्षदएकोराजापरक्षेत्रगः।अपरस्तुराजाऽन्यक्षे
त्रगएवोच्चगोऽल्पवर्षदस्तदाबहुवर्षदंत्यक्त्वाऽल्पवर्षदमेवोच्चगृहमाश्रित्यनाथांताइ
तिरीत्याऽत्रानयनंकार्यमिति।अन्यच्चवृद्धैरुक्तम्।न्याश्सयोऽग्रहहीनत्वेवैकस्थान्येनसं
युतो।ग्राह्योराशिर्ग्रहाभावस्तत्स्वाम्युच्चगतोयदि।एकत्रस्वर्क्षगः खेटश्चान्यत्रद्वौग्रहौयदि।।

ग्रहद्वययुतिं हित्वा ग्राहयेत्सूर्वभं सुधा।रिति।अयमर्थः। न्यासयोर्लग्नसप्तमयोर्द्वयोः स्वा
न्ययोर्ग्रहाभावे। अथवा द्वयोर्मध्ये एकस्वान्येन केनचिद्ग्रहेण स्वेश्यातिरिक्ते न युतो
सत्यां च तत्र यो राशिर्न्यायेन निर्बलः स राशिस्तद्राशीशोऽच्चंगते सति बलवानेव नाप
रः सग्रहोपि॥ एकत्र राशौ स्वक्षेत्रगो ग्रहः। अपरत्र द्वौ ग्रहौ स्तस्तत्र राशिस्वामिकराशि
रेव बलवानिति द्वितीयपद्यतात्पर्यम्। उच्चराशायस्तु॥ अजवृषभमृगांगनाकुलीराझ
षवणिजौ च दिवाकरादितुंगाः। दशशिखिमनुयुक्तिथींद्रियांशैस्त्रिनवकविंशति
भिश्च तेस्तनीचाइति॥ पंचमे पदक्रमात्साक्यत्यत्कमिति वक्ष्यमाणस्त्वत्रक्रमव्युत्क्रम
भेदेन दशा लेख्या। आरंभावधिस्तु लग्नमेव। चरदशायामत्रेभः केतुरिति सूत्रा
दशायाश्चरदशेति नामबोध्यमित्यर्थः। अथाग्रे फलविशेषज्ञापनाय राशीनामा
रूढापरपर्यायपदमुपदिशति॥ यावदीशाश्रयं पदमृक्षाणाम्। ऋक्षाणां राशीनां
ईशाश्रयं यावत् तद्दशाश्रयराशिपर्यंतं या संख्या तामीशाश्रयादग्रे प्रणीयतत्संख्याय

स्मिन्राशौ समाप्तात्द्वात्रिंशस्तद्गृहस्वामिकरान्तेः पदं स्यादित्यर्थः। ननु ईशाश्रयाद
न्यपणीये त्यर्थः कथं उच्यते॥ यावांश्चासावीशश्च यावदीशः यावदीशः आश्रयो यस्य
तद्यावदीशाश्रयमिति समासाद्व्युत्पत्तिरिति॥ तदेव स्पष्टं रुक्तम्॥ लग्नाद्यावतिथे तिष्ठे
दीशो लग्नेश्वरः क्रमात्॥ ततः स्तावतिथं राशिं जन्मारूढं प्रचक्षते। लग्नाधिपतिर्य
द्राशिसंस्थस्ततः पुनः॥ तावान्ऋषिभिरारूढः कथितः सर्वशास्त्रतः। यदा लग्नाधि
पो लग्ने सप्तमे वास्थितो यदि आरूढं लग्नमेवात्र निर्दिशेत्कालवित्तमः॥ इदं च श्लोके
न लग्नपदनिरुक्तं। द्वितीयादीनां पदानामप्युपलक्षणं बोध्यम्॥ श्लोकास्पष्टार्थाः॥ अ
थारूढोदाहरणसूत्रद्वयमाह। स्वस्थे दाराः॥७॥ लग्नात्स्वस्थे चतुर्थे लग्नस्वामिनि दाराः
सप्तमस्थो राशिर्लग्नारूढं भवतीत्यर्थः॥ सुतस्थे जन्म॥ लग्नात्सुतस्थे सप्तमस्थे लग्नस्वा
मिनि जन्मलग्नमारूढं भवतीत्यर्थः। यावदीशाश्रितिः सूत्रेणैव सिद्धे एतत्सूत्रद्वयमुदाहर
णद्वारा स्पष्टार्थं पठितमिति॥ यत्तु आद्यैः स्वस्थे दारा विचारणीयाः। सुतस्थे जन्म

जे॰स॰टि॰ विचार्यमित्युक्तंतदसंगतमेवप्रतिभातिइति।अथात्रभावराशिबोधकपदानामन्यत्रा
संत्रतोवैलक्षण्यमात्रंकथ्यते।सूत्रम्।सर्वत्रसवर्णभावाराशयश्च।भावाराशयश्चस
वर्णाःवर्णेनसहितास्सवर्णाःएकादिसंख्याबोधकाक्षरगम्यासर्वत्रग्रंथे।ननुसिद्धमन्यदि
तिवक्ष्यमाणत्वात्शिवतांडवादिग्रंथेषुकटपयादिवर्णैःसूचितसंख्याप्रसिद्धैवकिमर्थ
मिदंसूत्रमिति।नचभावराशिग्रहसाधारण्येनबोधःस्यादितिवाच्यम्॥भावराशिनांसं
ख्याप्राधान्याद्ग्रहाणांतुग्रहवाचकपदप्राधान्यात्साधारण्येनबोधोनस्यात्किमर्थंसू
त्रेतिसूत्रमित्याशंक्यवर्णदराशिपरमेतदितिप्रकारांतरेणतत्सूत्रंव्याख्यायते॥सर्व
त्रसवर्णभावाराशयश्च॥भावाराशयश्चसवर्णा।वर्णेनवर्णदेनसहिताःसवर्णभवंति।
वर्णदानयनप्रकारस्त्वित्थंदृष्टैरुक्तः।ओजलग्नप्रसूतानांमेषादेर्गणयेत्क्रमात्॥यु
ग्मलग्नप्रसूतानांमीनादेरपसव्यतः।मेषमीनादितोजन्मलग्नांतंगणयेत्सुधीः।तंथे
वहोरालग्नांतंगणयित्वाततःपरं।पुंस्त्वेनस्त्रीतयावैतेसजातीयेकुभे यदि॥तर्हिसंख्य ॥ए॥

योजयीत चेजात्येत्तु वियोजयेत्॥ मेषमीनादितः पश्चाद्यो राशिः स तु वर्णदः॥ ओजयुग्मल
ग्नानुरोधेन योजनं शोधनोत्तरं द्वादशाधिके रविश्चतष्टं कृत्वा यत्स्थितं तन्मेषमीनादिक
मव्युत्क्रमगणनया यो राशिर्लभ्यते स वर्णदराशिरिति बोध्यम्॥ धनभावादीनां वर्णदा
नयने मेषमीनादिगणनया तत्तद्भावांतगणना विधेयेति॥ होरालग्नभयोर्ज्ञेयाद्बला
द्वर्णदाद्दशा॥ यत्संख्यो वर्णदो लग्नात्तत्संख्याक्रमेण तु॥ क्रमव्युत्क्रमभेदेन दशास्या
त्पुरुषस्त्रियोः॥ लग्नात् यत्संख्यो वर्णदराशिस्तत्तत्संख्याक्रमतः॥ ओजयुग्मलग्नानु
रोधेन प्रथमप्रवृत्तक्रमव्युत्क्रममर्यादया तत्तद्राशीनां दशास्यादिति॥ यथा नाथांता इति
सूत्रे स्वस्वराशेर्नाथांतवर्षाण्यानीतानि तथात्र जन्मलग्नात्स्वस्ववर्णदपर्यंतं वर्षा
ण्यानेयानीति॥ मेषमीनादितः पूर्वोक्तरीत्या धनभावादितत्तद्भावांतगणनां विधाय पूर्व
वत्करणेन तत्तद्भाववर्णदराशयो भवंतीति सर्वत्रेति पदेन सूचितं॥ न च वर्णदानयनं व
र्णददशानयनं च सूत्रार्थान्नायातीति वाच्यम्॥ सिद्धमन्यदिति सूत्रादन्यऋषीणां शास्त्र
प्रसिद्धत्वादत्र नोक्तम्। प्राचीनैः संग्रहीतमिति॥ गुलिकोपि तथैव॥ यथा वर्णदो राशिर्व

ग्नोजयुग्मत्वभेदेन मेषमीनादिगणनया जन्मलग्नहोरालग्नपर्यंतं संख्यावत्रातः स
मा~~सा~~नीतस्तथैव भावलग्नमेव जन्मलग्नं विभाव्य भाववर्णदराशिरानेया इति। अ
थ भावलग्नानयनं वृद्धैरुक्तम्॥ सूर्योदयं समारभ्य॥ घटिकानां तु पंचकं प्रयाति ज
न्मपर्यंतं भावलग्नं तथैव च॥ तथा सार्द्धद्विघटिकामितात्कालाद्धि लग्नं भात्॥ प्रयाति
लग्नं तन्नाम होरालग्नं प्रचक्षते इति। स्पष्टार्थौ श्लोकौ। होरालग्नस्य स्पष्टीकरणं तु॥
सार्द्धद्वयघटिकया चेत्त्रिंशदंशा लभ्यंते तर्हि इष्टघटिकया किमिति त्रिराशिकेन
ज्ञेयम्॥ होरालग्नानयने। जन्मलग्ने विषमे सति सूर्यराशितो। जन्मलग्ने समे सति तु
जन्मलग्नाद्गणयेत्॥ सूर्योदयमारभ्य यावत्यो होरा इष्टकाललग्नपर्यंतं जातास्ताः सू
र्याल्लग्नाद्वा परिगणय्यांतिमं होरालग्नं ज्ञेयमिति प्राचीनकारिकातोयमर्थोनायाती
ति॥ भावलग्नं होरालग्नं च जन्मलग्नाद्गणनीयमिति। वर्णदराशितः फलमुक्तं वृद्धैः॥
पापदृष्टिः पापयोगो वर्णदस्य त्रिकोणके। ~~तथैव वर्णदस्यापि~~ यदि स्यात्तर्हि तज्ज्ञाश्चिप
र्यंतं तस्य जीवनम्॥ रुद्रशूले यथैः॥ वायुमरणादि निरूप्यते। तथैव वर्णदस्यापि त्रिकोणे

पापसंगमे॥ वर्णदासप्तमाद्राशेः कलत्रादि विचिंतयेत्॥ एकादशादग्रजं तु तृतीयाच्च
यवीयसं॥ पंचमे तनुजं विंद्यान्मातरं तुर्यपंचमे॥ पितुस्तु नवमान्मातुः पंचमाद्वर्णदस्य
तु॥ शूलराशिदशायां वै प्रबलायामरिष्टकं। वर्णदराशेः पंचमात्प्रबलशूलदशायां
मातुररिष्टं वर्णदराशिनवमात प्रबलशूलदशायां पितुररिष्टं स्यादित्यर्थः॥ अथा
पवादमाह सूत्रम्। नग्रहाः॥ प्रथमपक्षे। भावा राश्यश्च सवर्णाः संख्याबोधकाक्षरगम्या
इत्युक्तं ग्रहास्तु न। प्रसिद्धपदगम्या एवेत्यर्थः॥ द्वितीयपक्षे। भावा राशयश्च सवर्णाः वर्ण
दराशिसहिता इत्युक्तम्। ग्रहास्तु वर्णदसहिता न। तथा च भावराशिवर्णदा भवंति न ग्रहा
णामित्यर्थः॥ अथांतरदशाभागं दर्शयति सूत्रम्। यावद्धिवेकः ४४ मावृत्तिभानौ॥ भानां रा
शीनां प्रतिराशि ये दशाब्दाश्चरस्थिरादिदशासु सिद्धास्तेषां द्वादशधा विभागेन द्वादश
राशीनामावृत्तिर्भवति॥ एवं च द्वादशराशौ [illegible] विवेकपदबोध्याश्चतुश्चत्वारिंशदधि
काशीति संख्या भवतीति तदुक्तं प्राच्यैः॥ [illegible] धारा त्रिदशांशा राशेर्भुक्तिक्रमाद्भवेत्

जै॰ सू॰ टि॰ एवं दशाविदिशादिरूपत्वात्तेन फलं वदेत्॥ यत्तु उपस्थिततया दशारंभावधिः स्वस्वलग्न
मेवेति पंथेरुक्तं तन्न। होरालग्नभयोर्नेयादुर्बलावर्णदादशेति कारिकोक्तत्वात्॥ एवंप्र
तिराशि द्वादशाब्दा इति विवेकसंख्या महादशाभिप्रायेण। तद्दशाविभागोऽत्रैवोक्तेः। एके
कभावस्यैकैकं वर्षं लग्नादि कल्पयेत्॥ सा पर्यायदशा लग्ने युग्मे तु व्युत्क्रमात् वदेत्॥ लग्न
युग्मं यदा तर्हि सम्मुखं तस्य चादिमिति। पर्यायदशा अंतर्दशेति। यदा लग्नं युग्मराशिस्त
दा तस्य संमुखं आदिराशिः। यथा वृषस्य मेष इति॥ अथ प्रकृतशास्त्रे वक्ष्यमाणसूत्रेषु
क्वचिद्धोराद्रेष्काणाद्यपेक्षासत्वेन तदाकांक्षानिवर्त्तयन्नाह सूत्रम् होरादयः सिद्धाः।
होराद्रेष्काणादयः सिद्धाः शास्त्रांतरप्रसिद्धमेषादिगणनया प्रसिद्धाः न तु द्वष्ठर्गवादिव
द्भुताः तदुक्तं वृद्धैः। राश्योरर्द्धं भवेद्धोरा ताश्चतुर्विंशतिः स्मृताः मेषादितासां होराणां परिवृ
त्तिद्वयं भवेत्॥ राशित्रिभागा द्रेष्काणास्ते च षट्त्रिंशदीरिताः। परिवृत्तित्रयं तेषां मेषादेः क्रम ॥११॥
तो भवेत्॥ सप्तांशपास्त्वोजगृहे गणनीया निजेशतः। युग्मराशौ तु विज्ञेयास्सप्तमर्क्षाधि

नायकात् । नवांशेशाश्चरेतस्मात् स्थिरे तन्नवमादितः ॥ उभये तत्संचमाङ्केरिति चिंत्यं विचक्षणैः । द्वादशांशास्यगणनां तत्तत्क्षेत्राद्विनिर्दिशे तु इति वस्तुतस्तु राशिग्राधान्याद्विलक्षणएवेति ध्येयमित्यर्थः ॥ ॥ इतिश्रीनीलकंठज्योतिर्विद्विरचितायां जेमिनिसूत्रे प्रथमस्य प्रथमपादः ॥ ॥ अथात्मकारकाश्रयनवांशमाश्रित्य फलानि वक्तुमुपक्रमते । तत्र कारकांशमधिकरोतिसूत्रम् अथस्वांशो ग्रहाणाम् टिका अथानंतरं ग्रहाणां रव्यादीनां मध्ये स्वांशः आत्मकारकाश्रितो योंशो । नवांशस्तस्मात् फलं चिंत्यमित्यर्थः अथ कारकाश्रितो मेषादिनवांशफलान्याह सूत्रम् पंचमूषिकामार्जाराः २ टिका मेषकारकांशश्चेन्मूषिकामार्जाराद् दुःखदा भवंतीति सूत्रम् तत्र चतुष्पादः ३ टिका वृषः कारकांशश्चेच्चतुष्पदा सुखदा भवंति मूषिकादयो दुःखदाश्चतुष्पादः सुखदा इत्यत्रैकारकपतयार्थो पेक्षितः कृत्तस्तु भिन्न रूपेणात्र बीजं किं उच्यते वृद्धवाक्यमेव बीजं वृद्धवाक्यं तु वृषतौल्यंशकगतस्तस्मिन्वा लाज्यवान् भवेत् ॥ मेषसिंहांशकगते ब्रूयान्मूषिकदंशनं ॥ का

रकेकार्मुकांशस्थेवाहनात्पतनंभवेत् इति सूत्रम् मत्स्योकंडुस्योल्पंच४ टिका मिथुनेकारकांशेकंडूः शरीरस्थोल्पंचभवतीत्यर्थः।। सूत्रम् दुरेजलकुष्टादिः५ टिका कर्के स्वांशेजलभयंकुष्टरोगोभवतीत्यर्थः।।सूत्रम् शेषाश्वापदानि६ टिका सिंहांशेशेषेत् श्वापदानिश्वनकाद्योदुःखदाभवंतीत्यर्थः।।सूत्रम् मत्सुवज्ज्वालाग्निकणश्च७ टिका कन्याकारकांशेमत्सुवत् मिथुनांशेवद्भवति अग्निकणश्च अग्निकणेनदुःखश्च भवतीत्यर्थः।।सूत्रम् लाभेवाणिज्यम्८ टिका तुलाकारकांशेवाणिज्यवान्स्यादित्यर्थः।।सूत्रम् अत्रजलसरीसृपात्स्तन्यहानिश्च९ टिका अत्रवृश्चिकांशेजलसर्पाद्योदुःखदाभवंतिमातुस्तन्यंदुग्धंचशुष्यतीत्यर्थः।।सूत्रम् समेवाहनादुच्चाच्चक्रमात्पतनम्१० टिका धनुषिकारकांशेवाहनादूर्ध्वप्रदेशाच्चक्रमात् किंचिद्वस्तुसंलग्नतयापतनंभवति।नऊटितीत्यर्थः।।सूत्रम् जलचरखेचरखेटकंडूदुष्टग्रंथयश्चरिष्फे११ टिका मकरेकारकांशेजलचरामत्स्यादयः।।खेचराःपक्षिणः।।खेटाग्रहाः।।एतेफलदाभवंति।कंडूदुष्टग्रंथिरोगाश्चभवंति।दुष्टग्रंथिगंडादिकमित्यर्थः।।सूत्रम् तडागादयोधर्मे१२ टिका कुंभेको

रकांशे तडागादयः तडागवापिकूपादिकर्तारो भवतीत्यर्थः॥ सूत्रम्॥ उच्चे धर्मनित्यताकैव
ल्यंच॥ ९२॥ टिका॥ मीने कारकांशे धर्मनित्यत्वं कैवल्यं मुक्तिश्च भवति॥ कारकेस्यांशादिगुणैः
फलैर्वृद्धेः संग्रहीतं॥ शुभराशौ शुभांशे वा कारके धनवान् भवेत्॥ तदंशाकेंद्रेषु शुभेरा
जान्नं प्रजायते॥ कारके शुभराश्यंशे लग्नांशास्खे शुभमये हे॥ उपग्रहस्य पाश्चात्येस्वोच्च
स्वर्क्षे शुभर्क्षगे॥ पापदृग्योगरहिते कैवल्यं तस्य निर्दिशेत्॥ मिश्रे मिश्रं विजानीयात् वि
परीते विपर्ययः॥ तदंशाकेन्द्रेषु कारकाश्रितांन्नसकुंडल्यां केंद्रेष्वित्यर्थः॥ उपग्रहस्येति उप
समीपे ग्रहः उपग्रहः ऽमात्यः॥ ग्रह स्तस्य पाश्चात्यो भ्रातृकारकः॥ तस्मिन्स्वोच्चस्वर्क्षशु
भर्क्षगे पापदृग्योगरहिते सति कैवल्यं मुक्तिर्भवतीत्यर्थः॥ यद्वा उपग्रहो राहुः केतुर्वा तयोर्म
ध्ये पाश्चात्यः केतुस्तस्मिन् मिश्रे पापशुभदृक्योगे मिश्रं स्वर्गवासः॥ विपरीते पापमात्रदृ
दृग्योगसाहित्ये विपर्ययः॥ न मुक्तिर्न स्वर्गवास इति॥ चंद्रभृग्वारवर्गस्थे कारके पारदा
रिकः॥ वृषतो व्यंशकगते तस्मिन्वाणिज्यवान् भवेत्॥ मेषसिंहांशके तस्मिन्क्रूरयान्म

षिकट्टश्चानं।कारके कार्मुकांत्रास्त्रे वाहनात्पतनं भवेत्॥ अथेदानीं कारकांशेग्रहस्थि
त्यादिनाफल्यान्युपदिशति। सूत्रम् तत्ररवौ राज्यकार्यपरः।१४ टिका कारकांशे सूर्ये सति
राजकार्यतत्परो भवतीत्यर्थः।सूत्रम् पूर्णेंदुशुक्रयोर्भोगी विद्याजीवी च।१५ टिका कारकां
शे पूर्णेंदुशुक्रयोः सतोर्भोगी विद्याजीवी चस्यादित्यर्थः। सूत्रम् धातुवादी कौंतायुधी
वह्निजीवी च भौमे।१६ टिका कारकांशे भौमे सति धातुवादी रसायनविद्यावान् वचेति
भाषया प्रसिद्धायुधः वह्निरुत्तजीवनवांश्च स्यादित्यर्थः। सूत्रम् वाणिजस्तंतुवायाः शि
ल्पिनो व्यवहारविदश्च सौम्ये।१७ टिका कारकांशे बुधे सति वाणिक्कृषक्तयो भवतीत्यर्थः।
सूत्रम् कर्मज्ञाननिष्ठा वेदविदश्च जीवे।१८ टिका कारकांशे गुरौ सति कर्मनिष्ठादयो भ
वंतीत्यर्थः। सूत्रम् राजकीयाः कामिनः शतेंद्रियाश्च शुक्रे।१९ टिका कारकांशे शुक्रे सति रा
जाधिकारवंतः बहुस्त्रीस्पृहालवः शतवर्षजीविनश्च भवंति। शतं शतवर्षं इंद्रियाणि २३
येषां मिति स्वामिनः। पंथास्तु शतानि इंद्रियाणि येषां वदंति तन्न इंद्रियाणां शतसंख्या

नादित्यर्थः। सूत्रम्। प्रसिद्धकर्मजीवः शनौ।२० कारकांशे शनौ सति लोकप्रसिद्धकर्म
णाजीवेदित्यर्थः। सूत्रम्। धानुष्काश्चौराश्च जांगलिका लोहयंत्रिनाश्च राहौ।२१ टिका
कारकांशे राहौ सति धानुष्काश्चौराः स्युः। किं वा जांगलिका लोहयंत्रिणश्च स्युः। वैक
ल्पिकमिदं फलद्वयं कथमवगतमिति चेत्। मध्ये चकारोपादानादेव॥ अन्यसूत्रेष्वेवं स
एवचकार उपात्तः। अत्र मध्ये किमर्थमिति। सूत्रम्। गजव्यवहारिणश्चौराश्च केतौ।२२
टिका कारकांशे केतौ सति फलमिदमित्यर्थः। सूत्रम्। रविराहुभ्यां सर्पनिधनं।२३ का
रकांशे रविराहुस्थितस्य सर्पान्मृत्युर्भवतीत्यर्थः। सूत्रम्। शुभदृष्टे तन्निवृत्तिः।२४ टि
काशुभग्रहावलोकिते रविराहुयोगे सर्पान्मृत्युर्न स्यादित्यर्थः। सूत्रम्। शुभमात्रसं
बंधाज्जांगलिकाः।२५। कारकांशगयोः रविराह्वोः शुभमात्रयोगे सति जांगलिको वि
षवैद्यो भवेत्। मात्रशब्देन पापग्रहनिवृत्तिरित्यर्थः। सूत्रम्। कुजमात्रदृष्टे गृहदा
हकः अग्निदो वा।२६ टिका कारकांशगयो रविराह्वोः कुजमात्रदृष्टयोः सत्यां स्वगृहदाह

कोऽग्निदो वा भवतीत्यर्थः। सूत्रम्। शुक्रदृष्टेर्न दाहः॥२७॥ टिकाकारकाँत्राकगत रविरा
ड्डोः शुक्रदृष्टो सत्यां गृहदाहो न स्यात् किंतु अग्निदानमात्रं करोतीत्यर्थः। सूत्रम्।
गुरुदृष्टेस्त्वासमीपगृहात्॥२८॥ टिकाकारकाँत्रागयोः रविराड्डोगुरुदृष्टो सत्यां शुक्र
दृष्टावसत्यां मासमीपगृहात् समीपगृहपर्यंतं दाहः स्यात् नखचगृहमात्रस्येत्यर्थः। सूत्र
म्। सगुलिके विषदो विषहतो वा॥२९॥ टिकाकारकाँत्रो गुलिकेसहिते सति परस्मै विषदा
ता वा स्वयं विषेण हतो वा स्यात्॥ गुलिकानयनप्रकारस्तु वृद्धैरुक्तः॥ रविवारादित्रान्यं
तं गुलिकादि निरूप्यते॥ दिवसानष्टधा कृत्वा वारेशाङ्गणयेत्क्रमात्॥ अष्टमोंऽशो निरी
शः स्यात् शन्यंशो गुलिकं स्मृतः। रात्रिरप्यष्टधा भक्ता वारेशात्पंचमादितः। गण
येदष्टमः खंडो नि — परिकीर्तितः। शन्यंशो गुलिकः प्रोक्तो गुर्वंशो यमघंटकः। भौमांशो
मृत्युरादिष्टो रव्यंशो कालसंज्ञकः। सौम्यांशो ऽर्द्धप्रहरकः स्पष्टकर्मप्रदेशतः॥ रव्यादि
वारेषु दिनमानमष्टधा विभज्य तत्तद्वारेशं प्रथमखंडाधिपं कृत्वा अग्रिमखंडेषु तत्तद्वा

रेखादग्निमग्रहात्क्रमेणैशत्वेन जानीयादष्टमः खंडस्तु निरीशः। एवं सप्तसु वारेषु शान्यं
शोगुलिको नाम॥ तथा च रविवारे सप्तमः। सोमे षष्ठः। भौमे पंचमः। बुधे चतुर्थः। गुरौ तृतीयः।
शुक्रे द्वितीयः। शनौ प्रथमः खंडो गुलिको भवति॥ सप्तस्वपि वारेषु रात्रिनामष्टधा विभज्य तत्त
द्वारेशात्पंचमाद्याः खंडाधिपा ज्ञेयाः। रात्रावप्यष्टमः खंडो निरीशः। एवं रविरात्रौ तृतीयः खं
डः सोमे द्वितीयः। भौमे प्रथमः। बुधे सप्तमः। गुरौ षष्ठः। शुक्रे पंचमः। शनौ चतुर्थः खंडो गुलि
को भवति। एवं सर्वेषु वारेषु दिने रात्रौ च गुरुखंडो यमघंट नामः। बुधखंडो अर्द्धप्रहराख्यः। रव्यं
शः कालसंज्ञकः। भौमांशः मृत्युनामेति ज्ञेयम्॥ स्पष्टकर्म इति गुलिकादीनां स्पष्टीकरणं तु स्व
स्वदेशलग्नप्रमाणानुसारेण तत्तत्खंडकालांत्यलग्नानि स्पष्टानि कृत्वा गुलिकादिलिकादि
स्पष्टलग्नं कस्यांशोऽस्ति स एव कारकांशश्चेत्स गुलिको जात इति विवेचनीयम्॥ तथा च संग्रहे।
तथा च रविवारादौ दिने गुलिकसंस्थितिः। सप्तर्तुशरवेदत्रिद्विकुखंडेषु क्रमात्॥ रात्रौ त्रिद्वि
कुसप्तर्तुपंचचतुर्येषु तत्स्थितिरित्यर्थः। सूत्रम्। चंद्रदृष्टो चोरापहृतधनश्चोरो वा। ऽटिका।
सगुलिके कारकांशे चंद्रदृष्टे सत्यां चोरैर्नीतधनः स्वयमेव वा चोरः स्यादित्यर्थः। सूत्रम्

जै सू॰टि बुधमात्रदृष्टे हहद्वीजः॥३१ टिका सकेतिके कारकांशेऽन्यग्रहादृष्टत्वे सति बुधदृष्टेस्तु
सत्वेषणे भवतीत्यर्थः॥ सूत्रम् तत्र केतौ पापदृष्टे कर्णछेदः कर्णरोगो वा॥३२ टिका सगुलि
क इति पदं निवृत्तं॥ तत्र कारकांशे नवांशाकुंडल्यां केतौ [redacted] सति पापदृष्टे कर्णछेदः॥ कर्ण
रोगो वा भवतीत्यर्थः॥ सूत्रम् शुक्रदृष्टे दीक्षितः॥३३ सकेतौ कारकांशे शुक्रदृष्टे सति क
चिद्धर्मक्रियया दीक्षितः स्यादित्यर्थः॥ सूत्रम् बुधशनिदृष्टे निवीर्यः॥३४ टिका सकेतौ कार
कांशे बुधशनिदृष्टे नपुंसकः स्यादित्यर्थः॥ सूत्रम् बुधशुक्रदृष्टे पौनःपुनिको दासीपुत्रो वा
॥३५ टिका सकेतौ कारकांशे बुधशुक्रदृष्टे पौनःपु [redacted] नरुक्तवचनवक्ता दासीपु
त्रो वा स्यादित्यर्थः॥ सूत्रम् शनिदृष्टे तपस्वी प्रेष्यो वा॥३६ टिका सकेतौ कारकांशे रवेष्टांत
रेण दृष्टे पितृशनिदृष्टे तपस्वी भृत्यो वा स्यात्॥ सूत्रम् शनिमात्रदृष्टे संन्यासाभ्यासः॥३७
सकेतौ कारकांशे रवेरंतरेण दृष्टे शनिनैव दृष्टे संन्यासाभ्यासः न पूर्णसंन्यास इत्यर्थः
केतावितिनिवृत्तम्॥ सूत्रम् तत्र रविशुक्रदृष्टे राजप्रेष्यः॥३८ टिका कारकांशे रविशुक्रा
भ्यां दृष्टे राजभृत्यो भवति॥ अथ कारकांशाद् द्वादशांशमवलंब्य विचारयति॥ सूत्रम्॥ ॥२५॥

रिष्फे बुधे बुधदृष्टे वा मंदवत्॥ ३९ टिकाकारकांशाद्द्वादशे बुधे सति बुधदृष्टे वा सति मं
दवत्॥ प्रसिद्धकर्मजीवः ज्ञानावित्तिस्त्रोपात्तफलं भवतीत्यर्थः॥ सूत्रम्॥ शुभदृष्टे स्थैर्यः॥ ४०
ग्र॰ह॰३ टिकाकारकांशाद्द्वादशे बुधेतरशुभैर्दृष्टे स्थिरो भवति न चंचलः॥ बुधेतरशुभदृष्टत्वं कथं
ज्ञातमिति चेत्॥ बुधदृष्टिफलस्योक्तत्वादेवेत्यर्थः॥ सूत्रम्॥ रवौ गुरुमात्रदृष्टे गोपालः॥ ४१
टिकाकारकांशाद्द्वादशे रवौ सति खेटांतरादृष्टे गुरुमात्रदृष्टे गोरक्षको भवतीत्यर्थः॥
अथ कारकांशाच्चतुर्थराशिफलमाह॥ सूत्रम्॥ दारे चंद्रशुक्रदृग्योगात्प्रासादः॥ ४२ टिकाकार
कांशाच्चतुर्थे चंद्रशुक्रदृष्टियोगाभ्यां प्रासादवान् भवति॥ सूत्रम्॥ उच्चग्रहेऽपि॥ ४३ कारकां
शाच्चतुर्थस्थिते उच्चराशिगतग्रहेऽपि प्रासादवान् भवतीत्यर्थः॥ सूत्रम्॥ राहुशनिभ्यां शि
लागृहं॥ ४४ टिकाकारकांशाच्चतुर्थस्थितराहुशनिभ्यां शिलानिर्मितं गृहं भवतीत्यर्थः॥ सू
त्रम्॥ कुजकेतुभ्यामैष्टकम्॥ ४५ गुरुणा दारवं॥ ताणं रविणा॥ ४६॥ इदं सूत्रत्रयं राहुशनि
भ्यामिति सूत्रेणैकरूपतव्याख्यानं॥ अथ कारकांशान्नवमांशफलमाह॥ सूत्रम्॥ समे शु

भद्दृग्योगाद्धर्मनिरतः सत्यवादी गुरुभक्तश्च ।४८। टिका कारकांशान्नवमे शुभदृष्टियोगाभ्यां
धर्मनिरतत्वादिमान् भवतीत्यर्थः । सूत्रं अन्यथा पापैः ।४९। टिका नवमे पापदृष्टियोगाभ्यां
धर्मनिरतत्वादिरहितो भवतीत्यर्थः । सूत्रम् शनिराहुभ्यां गुरुद्रोहः ।५०। टिका नवमस्थाभ्यां
शनिराहुभ्यां दृष्टिभ्यां वा गुरुद्रोहः । सूत्रम् गुरुरविभ्यां गुरावविश्वासः ।५१। टिका नवमे गुरु
रविभ्यां दृग्योगाभ्यां गुरावविश्वासो भवति । सूत्रम् ॥ तत्र भृग्वंगारकवर्गे पारदारिकः ।५२। टि
कारकांशान्नवमे शुक्रभौमान्यतरषड्वर्गे सति परस्त्रीसक्तः स्यादित्यर्थः । सूत्रम् दृग्योगाभ्याम
धिकाभ्यामामरणम् ।५३। टिका नवमे शुक्रभौमान्यतरषड्वर्गे सति षड्वर्गापेक्षया अधिका
भ्यां शुक्रभौमदृष्टियोगाभ्यां मरणपर्यंतं पारदारिको भवतीत्यर्थः । सूत्रम् । केतुना प्रतिबंधः
।५४। टिका कारकांशान्नवमे केतोर्दृष्टियोगाभ्यां प्रतिबंधः आमरणपारदारकस्य निवृत्ति
र्भवतीत्यर्थः । सूत्रम् गुरुणा स्त्रैणः ।५५। टिका नवमस्थेन नवमदृष्ट्या वा गुरुणा स्त्रीलोलः ।
सूत्रम् राहुणार्थनिवृत्तिः ।५६। टिका नवमस्थेन नवमदृष्ट्या वा राहुणा परस्त्रीसंगनिमित्तं

द्रव्यनाशःस्यादित्यर्थः। अथकारकांशात्सप्तमफलमाह। सूत्रम्। लाभेचंद्रगुरुभ्यांसुंदरी॥
५७ टिका। अत्रदृक्पदंनिवृत्तं। नवमप्रकरणस्यसमाप्तत्वात्। कारकांशात्सप्तमेचंद्रगुर्वो-
र्योगेसतिस्त्रीसुंदरीभवतीत्यर्थः। अथसूत्रम्। राहुणाविधवा। ५८। टिका। सप्तमेराहुयोगेवि-
धवास्त्रीगृहेभवतिइत्यर्थः। सूत्रम्। शनिनावयोधिकारोगिणीतप। — नीवा। ५९। कुजेनवि-
कलांगी। ६०। टिका। अलक्षणांगीत्यर्थः। सूत्रम्। रविणास्वकुलेगुप्ताच। ६१। टिका। सप्तमेरवि-
योगेस्वकुलेभर्तृकुलेगुप्तारक्षितास्थितास्याद्वामरणंनतुस्वातंत्र्येणयतस्ततोऽटनशी-
ला। चकारात्विकलांगीच। सूत्रम्। बुधेनकलावती। ६२। टिका। गीतवाद्यादिकुशलाइत्यर्थः।
सूत्रम्। चापेचंद्रेणानावृत्तेदेशे। ६३। टिका। कारकांशाच्चतुर्थेचंद्रेसतिपूर्वोक्तयोगेषुसत्सु
अनाच्छादितेदेशेप्राक्स्त्रीप्रथमसंगइत्यर्थः। कारकांशात्सप्तमेधनुषिचंद्रेइतिवार्थः।
अथकारकांशात्तृतीयफलमाह। सूत्रम्। कर्मणिपापेशूरः। ६४। टिका। कारकांशात्तृतीये
पापेसतिशूरःस्यादित्यर्थः। सूत्रम्। शुभेकातरः। ६५। टिका। तृतीयेशुभेकातरइत्यर्थः। अथतृ

जै॰ सू॰ टि॰

तीयषष्ठयोः फलमाह। सूत्रम्। मृत्युचित्तयोः पापेषु कर्षुकः।६६। टिकाकारकांशात् तृतीयष
ष्ठयोर्द्वयोरपि पापसत्वे कृषीवलः स्यादित्यर्थः। सूत्रम्। समे गुरु विशेषेण ६७। टिका नवमे गुरौ
विशेषेण कृषीवलः स्यादित्यर्थः। अथ कारकांशाद् द्वादशफलमाह। सूत्रम्। उच्चे शुभे शुभलो
कः।६८। टिका द्वादशे शुभे सति शुभलोकप्राप्तिः। सूत्रम्। केतौ कैवल्यम्।६९। टिकाकारकांश
के शुभे सति मुक्तिरित्यर्थः। अथवा कारकांशाद् द्वादशे केतौ सति मुक्तिरिति वार्थः। सूत्रम्।।
क्रियचापयो विशेषेण ७०। टिकाकारकांशे मेषधनुषि वा तत्र शुभे सति विशेषेण मुक्तिः
सायुज्यमुक्तिरित्यर्थः। अथवा मेषधनुषि वा द्वादशे केतौ सति सायुज्यमुक्तिरिति वस्तुतस्तु
शुभापेक्षया केतोः सायुज्यमुक्तिदातृत्वायोग्यत्वात् प्रथमव्याख्यैव समुचितेति बोध्यम्। नच
सूत्रकारेण केतोः शुभत्वमुक्तं केतौ शुभेच्छुभं स्यात्तर्हि चरदशायामत्र शुभः केतुरिति वक्ष्यमा
णसूत्राच्चरदशायामेव शुभः केतुरन्यत्र नेत्यर्थो विगम्यत इति॥ सूत्रम्। पापैरन्यथा। ७१ टिका
कारकांशाद् द्वादशे कारकांशे च पापयोगे न न च शुभलोको न च मुक्तिरित्यर्थः। सूत्रम्। रविकेत ॥१२

भ्यां त्रिवेभक्तिः।७२। टिका अत्रामात्यदासेच्चैवमितिपर्यंतं केनाविति पदमनुवर्त्तते॥ कारकांशे
रविकेतुभ्यां मिलिताभ्यां स्थिताभ्यां त्रिवेभक्तिर्भवति। अग्रेप्येवमेव योजना॥ सूत्राणि। चंद्रेण
गौर्यां ७३। शुक्रेण लक्ष्म्याम् ७४। कुजेन स्कंदे ७५। बुधशनिभ्यां विष्णौ ७६। गुरुणा सांबत्रिवे ७७।
राहुणा तामस्यां दुर्गायां च ७८। टिका तामस्यां भूतादिदेवतायां दुर्गायां चेत्यर्थः। केतुना गणेशे स्कं
दे च ७९। पापर्क्षे मंदे क्षुद्रदेवतासु ८०। कारकांशे पापराशौ तत्र शनौ सति कर्णपिशाच्यादिषु भ
क्तिः। सूत्रम् शुक्रे च ८१। कारकांशे पापराशौ शुक्रे तथैव। सूत्रम् अमात्यदासे चैवम् ८२। आत्मका
रकग्रहान्न्यूनांशो ग्रहः अमात्यस्तस्माद्यो दासो रव्यादिगणनया षष्ठो ग्रहस्तस्मिन्पापर्क्षे का
रकांशे सति क्षुद्रदेवताभक्तिरित्यर्थः। पंथास्तु अयमर्थः सूत्रसंमतश्चेत्पापर्क्षे मंदे शुक्रामात्य
दासेषु क्षुद्रदेवतासुभक्ति इति सूत्रं प्रणीतं स्यादिति वदंति तन्न। एवं चेन्मंदशुक्रामात्यदासे
षु मिलितेषु पापर्क्षेषु सत्सु क्षुद्रदेवताभक्तिरित्यर्थः स्यात् भवनि तु एते ग्रामा— तरस्यापि
पापर्क्षस्थित्या क्षुद्रदेवताभक्तिस्तस्माद्योगविभाग एवोचित इत्यर्थः। सूत्रम् त्रिकोणे पाप

द्वये मांत्रिकः ८३ ॥ टिकाकारकांशात्पंचमनवमयोः पापद्वये क्रमेण स्थिते सति मांत्रिकः मं
त्रवेत्ता भवतीत्यर्थः ॥ सूत्रम् पापदृष्टे निग्राहकः ॥ ८४ टिका त्रिकोणद्वये सपापे पापदृष्टे भक्ता
दीनां निग्रहकर्त्ता स्यात् ॥ शुभदृष्टेनुग्राहकः ८५ ॥ टिका त्रिकोणे सपापे शुभदृष्टेऽनुग्राहकः
लोकेषु अनुग्रहकर्ता स्यात् ॥ सूत्रम् शुक्रेन्दौ शुक्रदृष्टे रसवादी ८६ ॥ टिकाकारकांशे चंद्रे शुक्र
दृष्टे सति रसवादि भवतीत्यर्थः ॥ सूत्रम् बुधदृष्टे भिषक् ८७ ॥ टिका शुक्रेन्दौ बुधदृष्टे सति वै
द्यो भवतीत्यर्थः ॥ सूत्रम् चापे चंद्रे शुक्रदृष्टे पांडुश्वित्री ८८ टिकाकारकांशाच्चतुर्थे चंद्रे शुक्र
दृष्टे सति श्वेतकुष्टी भवतीत्यर्थः ॥ सूत्रम् कुजदृष्टे महारोगः ८९ ॥ टिका चापगे चंद्रे कुजदृष्टे म
हारोगः कुष्टी भवति ॥ सूत्रम् केतुदृष्टे नीलकुष्टम् ९० ॥ टिका अर्थः प्राग्वत् इत्यर्थः ॥ सूत्रम् तत्र
मृतौ वा कुजराहुभ्यां क्षयः ९१ टिकाकारकांशाच्चतुर्थे पंचमे वा यथायोगं कुजे राहौ चेत्तर्हि क्षय
रोगो भवतीत्यर्थः ॥ चंद्रदृष्टौ निश्चयेन ९२ टिका उक्तस्थानयोः कुजराह्वोश्चंद्रदृष्टौ सत्यां नि
श्चयेन क्षयरोगः ॥ चंद्रदृष्ट्यभावे क्षयः स्वल्पः चंद्रदृष्टौ प्रबल इति भावः ॥ सूत्रम् कुजेन पिटका

दिः॥९३॥टिका तत्र मृतौ वा स्थितेन कुजेन पिटकादिर्भवति॥सूत्रम्॥केतुना ग्रहणी जलरोगो वा
॥९४॥टिका तत्र मृतौ वा केतुश्चेत्तदा ग्रहणी जलोदराद्या रोगा भवंतीत्यर्थः॥सूत्रम्॥राहुगुलिका
भ्यां क्षुद्रविषाणि॥९५॥टिका तत्र मृतौ वा राहुगुलिकौ यदि तर्हि मूषकादिविषाणि भवंति॥
सूत्रम्॥तत्र स्थाने धानुष्कः॥९६॥टिका मृतावितिनिवृत्तम्॥कारकांशाच्चतुर्थस्थाने धनुषि निपु
णः॥सूत्रम्॥केतुना घटिकायंत्री॥९७॥तत्र केतुश्चेत् घटिकायंत्री भवति॥सूत्रम्॥बुधेन परमहं
सो लगुडी वा॥९८॥टिका तत्र बुधे सति परमहंसो लगुडी वा॥अत्र सर्वत्रापि तत्रेति दमन्वेति
सूत्रम्॥राहुणा लोहयंत्री॥९९॥रविणा खड्गी॥१००॥कुजेन कुंती॥१॥टिका तत्र स्थिते राह्वादिभिस्त
त्फलानि भवंतीत्यर्थः॥सूत्रम्॥मातापित्रोश्चंद्रगुरुभ्यां ग्रंथकृत्॥२॥टिका कारकांशे तत्पंचमां
शे वा यथायोगं चंद्रगुरू चेद्ग्रंथकर्ता भवतीत्यर्थः॥सूत्रम्॥शुक्रेण किंचिदूनम्॥३॥कारकांशे
तत्पंचमांशे वा चंद्रशुक्राभ्यां किंचिदूनं ग्रंथकर्तृत्वं स्यात्॥ननु अयमर्थस्त्वया कथं लब्ध इति चे
त् केवलशुक्रेणाग्रे फलस्य वक्तव्यत्वात्॥न च ग्रंथकर्तृत्वे किंचिदूनं काव्यादित्वं च भवतिइ

तिवाच्यम्।एवंचेत्शुक्रेणकिंचिदूनंग्रंथकृत्कविर्वाग्मिकाव्यकर्त्ताचेतिसूत्रंप्रणीतंस्यात्
तस्माद्यमेवार्थःसूत्रसंमतः।नचसमासान्तःपतितपदानामेकांशानुवृत्तेरनौचित्यमिति
वाच्यम्।अस्मिन्ग्रंथेत्वियंरीतिरस्त्येवेति॥सूत्रम् बुधेनततोपि४।टीकाकारकांशेतत्संच
मेवाचंद्रबुधाभ्यांशुक्रयोगापेक्षयापिन्यूनग्रंथकर्तृत्वंस्यात्।सूत्रम् शुक्रेणकविर्वाग्मीका
व्यकृच्च५।टीकामातापित्रोरेकत्रशुक्रयोगेकव्यादिस्यात्॥सूत्रम् गुरुणासर्वविद्याधिकश्च
६।टीकाअर्थःपूर्ववत्।सूत्रम् नवाग्मी७।बहुत्वंनेत्यर्थः।अथपुनरपिगुरोरेवफलमाह सूत्रम्
विशिष्टवैयाकरणोवेदवेदांतविच्च८।स्पष्टम्।सूत्रम् सभाजडःशनिना९।शनिमात्रयुक्तस्वा
नगेनमंदेनसभाजाड्यम्।सूत्रम् बुधेमीमांसकः१०।स्पष्टार्थः।सूत्रम् कुजेननैयायकः११।स्पष्टा
र्थः।सूत्रम् चंद्रेणसांख्ययोगज्ञःसाहित्यज्ञोगायकश्च१२।स्पष्टार्थः।सूत्रम् रविणावेदांतज्ञोगीत
ज्ञश्च१३।केतुनागणितज्ञः१४।स्पष्टार्थः।सूत्रम् गुरुसंबंधेनसंप्रदायसिद्धिः१५।टीकापूर्वोक्तयो १९
गेषुगुरुदृष्टिगुरुषड्वर्गसंबंधेसतितत्तच्छास्त्रसंप्रदाययुक्तोभवतीत्यर्थः।सूत्रम् भाग्येचैवं१६।टि

काकारकांशाद्वितीयेपिचंद्रगुर्वादिपूर्वोक्तयोगग्रंथकर्तृत्वादिपूर्वोक्तंफलंस्यादित्यर्थः॥सू
त्रम्॥सद्दाचैवमिसेके॥१७॥कारकांशात्तृतीयेपिपूर्वोक्तग्रहयोगे ग्रंथकर्तृत्वादिफलमुह्यमि
त्यके॥सूत्रम्॥भाग्यकेतौपापदृष्टेस्तब्धवाक्॥१८॥टिका॥कारकांशाद्वितीयेकेतौपापदृष्टे सति
स्तब्धवाक् किंचित्संलग्नवचः किंवाप्रत्युत्तरदानेनऽटिति असमर्थवाणीकःस्यात् इत्यर्थः॥
सूत्रम्॥स्वपित्रपदाद्भाग्यरोगयोःपापसाम्येकेमद्रुमः॥१९॥टिका॥स्वीयजन्मकालग्नाज्जन्मल
ग्नारूढाद्वितीयाष्टमयोःराश्योःकेवलोपापोस्तुःसग्रहत्वेपिशुभपापान्यतरैकग्रहवत्वेनद्वि
ग्रहवत्वादिनासंख्याचेत्तुःतदाकेमद्रुमयोगोभवति॥ननुस्वशब्देनकारकांशबोधःकथंन
उच्यतेस्वशब्दकारकांशबोधश्चेत्पितृपदादिति वाक्यादेवतल्लाभेपुनरुपादानंव्यर्थस्यात्
स्वशब्दाभावेपितृपदात्कारकांशात्कारकांशारूढाद्वयमर्थःस्यात् अपेक्षितस्तुजन्मलग्ना
ल्लग्नारूढाद्वेति॥स्वशब्देनतुस्वीयलग्नाल्लग्नारूढाद्वित्यर्थोभवतीति॥अयमेवार्थःपरंपराश्रु
तत्वात्प्राचीनैरुक्तः॥आरूढाज्जन्मलग्नाद्वापापौस्त्रीहानिर्गोयदि॥केवलौसग्रहत्वेपिसमसं